National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(23): 93-94
© 2019 NJHSR
www.sanskritarticle.com

**Dr,Joginder Singh**
PGT,Sanskrit,
Delhi

**Correspondence:**
**Dr,Joginder Singh**
PGT,Sanskrit,
Delhi

# "वर्तमानपरिप्रेक्ष्ये भारतीय संस्कृतिः"

## डॉ.जोगिन्द्र सिंह

मानवस्य जीवनयात्रायाः अंगद्वयं वर्तते – सभ्यता संस्कृतिश्चेति। सभ्यशब्दः सभा शब्दतः निष्पन्नः। यं कर्म समाजः अभिलषति सः कर्मः सभ्यता इति उच्यते। संस्कृतिस्तु सभ्यतातः बहु उर्ध्ववर्तते। मानवीय साधनायाः पञ्च सोपानानि सन्ति – १. शरीरं २. आत्मा ३. मन ४. बुद्धि ५. अध्यात्मश्चेति। एतेषां सिदिः संस्कृति इति कथ्यते। वैदिक – कालादारभ्य द्वादशताब्दीं यावत् यैः तत्त्वसाधनैः भारतीयसंस्कृतेः निर्माणम् अभवत् तानि तत्त्वसाधनानि भारतीयसंस्कृतेः मूलम्। संस्कृतिः इति पदस्यार्थः वर्तते यत् संस्करणं परिमार्जन, शोधनं, परिष्करणं वा। अर्थात् संस्कृति नाम तादृशी क्रिया, या मानवे निर्मलतां संचारयति। अनेके जनाः मिलित्वा समाजं जातिश्च निर्मान्ति। अर्थात् मनु याणां पारस्परिक सम्बन्धजालः एव समाजः। निर्मलहृदयसम्पन्नाः संस्कृताश्च जनाः संस्कृतं भवन्ति, एतेषां राष्ट्रमपि संस्कृतं भवति। एतेषां निर्मलविधायकतत्त्वं संस्कृतेः मूलसूत्रं भवति।

भारतीया संस्कृतिरजरामरावर्त्तते इत्यत्र नास्ति सन्देहलेशोऽपि भारतीयानामस्माकम्। संस्कृते र्वेदमूलकत्वाद्वेदस्य चापौरूषेयत्वात्। 'धाता यथापूर्वमकल्पयत्' 'न कदाचिदनीदृशंजगत्' इत्याद्यनेकेन प्रमाणेन नैरन्तर्यमपि सिद्धयति। नित्यत्वादविच्छिन्न त्वाच्च सनातनशब्देन शाश्वतिकशब्देन च व्ययदेशमर्हति। अपरदेशीयानां संस्कृतिनां भवति। कदाचित्कालक्रमेण विनाशः, परन्तु नास्याः संस्कृतेः कदापि सर्वथा लोपप्रसक्तिर्भवति। किञ्चिद्ह्रासादिकन्तु कालजन्यं जायत इत्यन्यदेतत्। संस्कृतिरियं प्राचीनता मण्डनमण्डितत्वेपि नूतनां स्फूर्ति न जहाति कदाचिदपि। तस्मास्तु भाण्डागार इव विराजते। अत एव उषादेव्याः मनोरमवर्णनप्रसंगे 'पुराणी युवतिः' शब्दस्य वर्त्तते प्रयोगः, तथैवेयं संस्कृतिरपि 'पुराणि युवतिः' इति सुस्पष्टं वक्तुं शक्यते। संस्कृतिरियं पुरातनी, तथापि यौवनोल्लासोन्मादोत्साहपूरपूरिता राजते। यथान्या संस्कृतिः मरणासन्ना भवति, जीवनस्यान्तिमश्वासं प्रतिक्षमाणा तिष्ठति, न तथेयमिति मन्तव्यमंवकयमेव। अत एव मृत्युञ्जयता प्राप्तेयं संस्कृतिरिति। कदाचिन्मृत्युरागच्छतीव प्रतिभाति, तथापि सा स्वयमेव विनश्यति। संस्कृतेरस्या विनाशे सामर्थ्यं नास्ति तत्र। अत एव पलायते। भारतीयायां संस्कृत्यां ब्राहत्वबलक्षात्रबलयोवर्त्तते विचित्रसंयोगः। परस्परमुभयो रक्ष्यरक्षकभावाकचर्यजनकः। राष्ट्रसंरक्षणंस्य दायित्वं क्षत्रिये भवति, तेषाञ्च संरक्षणदायित्वमध्यात्मशक्ति सम्पन्नेषु ब्राह्मणेषु भवति। अध्यात्मशक्त्यैव राजानं सन्मार्गे व्यवस्थापयन्ति ब्राह्मणाः। क्षत्रियो नरपतिप्रभुशक्तिप्रतिनिधिर्भवतिस्म। ब्राह्मणश्च मन्त्र शक्तिसम्पन्नसचिवस्तस्यासीत्। भौतिकशक्तिसम्पन्नाः क्षत्रियाः समभवन्। ब्राह्मणाश्चाध्यात्म-शक्तिसम्पन्नाः। अत एवोभयोः पवनाग्निसमागमरूपेण समुपवर्णयन्ति सुकवयः। यथा – "पवनाग्निसमागमो हयं सहितं ब्रह्यदस्त्रतेजसा"। इत्यादि अयमेव मणिकाञ्चनसंयोगः मृत्युञ्जये कारणं वेदितव्यम्। संस्कृतेरस्या वैशिष्टयत्रयं समवलोकयामः। यथा – समञ्जसता, सहिष्णुता, ग्रासिष्णुताच। प्राप्तपरिस्थित्यनुकूला परिवर्त्तन शीलता। यदा यादृशी परिस्थितिः समक्षं समागच्छति, तथैवात्मानं परिवर्त्तयति यदि शत्रूणामाक्रमणं जायते, तस्याश्च संस्कृतिरपि सहैव समागच्छति, तां सहते, न व्याकुली भवति। तदनन्तरं संस्कृतिं ग्रसते अर्थात् आत्मसात् करोति। गुणत्रयमिदं महनीयत्वं गौरवत्वञ्च सम्पादनामालमिति मन्तव्यम्। एवमेवविज्ञानमपि स्वीकरोति अधिक योग्यता सम्पन्ना एव जीवन्ति। अयोग्याः परास्ताः भवन्ति। ते कथमपि जीवितुं समर्थाः न भवन्ति।

देशेस्मिन् धर्मानुष्ठानयोपासनासम्पादनायावानेकानि मतानि विद्यमानानि सन्ति, तथापि तानिन संस्कृति भेदकार्निं, अपितु परस्परं सामञ्जस्यसम्पादकानि एव भवन्ति। वेदप्रामाण्यविषये सर्वेषां मतैक्यत्वात्, तत्प्रभवत्वाच्च समेषां मतानाम्। अतएव न कुत्रापि भेद प्रतीतिः। अतएव चास्याः संस्कृतेः विपुलतायाः व्यापकतायाः वा परमं रहस्यं प्रतिपिपादमिषा वर्त्तते चेत्तर्हि शब्दस्यैकस्यैव प्रयोगः पर्याप्तः। स शब्दोऽस्ति 'समन्वय' परस्परं समन्वयस्य प्राधान्यं विद्यतेस्यां संस्कृत्याम्। कुञ्जिकेयं भारतीयायाः संस्कृत्याः। अस्यां मार्गद्वयं निर्दिष्टं वर्त्तते –

**प्रवृत्तिमार्गः निवृत्तिमार्गश्च। तथा चोक्तं मनुनासुखाभ्युदयिकं चैव नैः श्रेयसिक मेव च। प्रवृत्तश्च निवृत्तश्च द्विविधंकर्म वैदिकम्॥**

(मनु. 12/88-90)

**इह चामुत्रं वा काम्यं प्रवञ्जतं कर्म कीर्त्यते।**
**निष्कामं ज्ञानपूर्वन्तु निवृर्त्तमुपदिश्यते॥**
**प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम्।**
**निवृतं सेवामानस्तु भुतान्मत्येति पञ्चष्वै॥**

अनेनैव च प्रकारेण धर्मार्थकाममोक्षाणां चतुर्णा पुरुषार्थानां वर्त्तते समन्वयः। समन्वयेनैव मानवजीवनस्य साफल्यमिति परमः सिद्धान्तः। वर्त्तते व्यासवचनमपि, यथा –

**कल्पायुषां स्थानज्यात् पुनर्भवात्, क्षणायुषां भारत भूजयो वरम्।**
**क्षणेन मर्त्येन कृतं मनस्विनः, सन्न्यस्य संयान्त्यभयं पदं हरेः॥**

भारतवर्षीयजीवन समक्षं स्वर्गोपि तुच्छो भवतिस्म। यथा –

**न यत्र वैकुण्ठकथा सुधापगा, न साधवो भागवतास्तदाश्रयाः।**
**न यत्र यज्ञेशमखा महोत्सवाः, सुरेशलोकोपि न वै सेव्यताम्॥**

तथा च भारतीयायां संस्कृत्यां यज्ञभावना, साम्यभावना, वर्णव्यवस्था, जन्मान्तरवादः, मानवस्वातन्त्रयमिद्यादीन्यनेकानि वैशिष्ट्यानि प्रतिपादितानि सन्ति। तेषामुपयोगस्यावश्यकता प्रतिभाति समनुभूयते च यथा –

**यावद् म्रियते जठरं तावत्स्वत्वं हि देहिनाम्।**
**अधिकं योमिमन्येत स स्तेनो दण्डमर्हति॥**

अपि च – **अयं निजः परोवेति गणना लघुचेतसाम्। उदारचरितान्तु वसुधैव कुटुम्बकम्॥**

वेदेप्यनेकान्युदाहरणानि सन्ति, यथा –

**संगच्छहवं संवदध्वं सं वो मनांसि जानताम्।**
**देवा भागं यथा पूर्वे सञ्जानाना उपासते।**

**समानो मन्त्र, समितिः समानी, समानं मनः सहचित्तमेषाम्।**
**समानं मन्त्रमभिमन्त्रयते वः, समानेव वो हविषा जुहोमि॥**

**समानी व आकृतिः समाना हृदयानि वः।**
**समानमस्तु वो मनो यथा वः सुसहासति॥**

इत्यादिभिर्मन्त्रैः समन्वयवादस्य साम्यवादस्य वा वर्तते प्रतिपादनम्। येपिसिद्धान्ताः प्रतिपादिताः सन्ति ते वेकस्याप्याचरण स्यात्तर्हि कथं कुत्रवा कोलाहलस्यावासरः स्यात्। भारतीयायां संस्कृतौ जीवनपर्यन्तमनुष्ठेयानां संस्कारााणामिव प्रतिपादनं वर्त्तते। संस्कृति संस्कारयोर्नातीव भेदः, उभयोः परस्परं पूरकत्वात्। सम्प्रति संस्काराणामनुष्ठानमेव न जायते, कथं कश्चित्संस्कृतो भवेत्, कुतश्चायास्यति संस्कृतिः। तत्र प्रशासकानामपि वर्त्तन्ते दोषाः। अत एव कथयन्ति जनाः – यथा राजा यथा प्रजाः। मानवजीवने वर्त्तते सर्वेषां संस्कारााणां समुपयोगिता न तेषां वैयर्थ्यकल्पनं कर्त्तव्यम्। एकमुदाहरणं यथा – पुत्रप्राप्यर्थमेव पुंसवनसंस्कारस्य वर्त्तते। विधानम्। तस्य परिपालनं भवेत्तर्हि कथं बालिकाभ्रूणहत्या भवेत्। सम्प्रति सर्वत्र सुरसा इव मुखं व्यादाय तिष्ठति। अनेनैव प्रकारेण विचार्यते चेत्तर्हि सर्वेषां संस्कारााणां समुपयोगितां प्रतिपादयितुं शक्यते। जनाः संस्कारविहीनाः सञ्जाताः। अतएव स्वकुत्सितसंस्कारवशात् कुत्रापि किमप्यनुतिष्ठन्ति वर्तमानकालिकराजनीत्यामपि न वर्त्तते प्राचीनकालीनराजनीति समवेशः। अतएव प्रशासका अपि नीतिविहीनाः सञ्जाताः प्रजा अपि। राजनीतिरतीव पावनं वस्तु प्राचीनकाले आसीत्। भारतीया संस्कृतेरभावादेव सामाजिकी, व्यवस्था समाप्ता सञ्जाता। मातापित्रोः, परस्परं भ्रात्रोः, पतिपत्न्योः, गुरुशिष्योः, सेव्यसेवकयोः पारस्परिकः सम्बन्ध एव परिसमाप्तः।

धर्मविहीनार्थव्यवस्था राजनीतिव्यवस्था च वर्त्तते। पुरा काले प्रजापालनमेव प्रशासकाना मासित्परमोधर्मः, परन्तु, सम्प्रति न दृश्यते तथा कुत्रापि। प्रजालुण्ठनमेव धर्मः। अतएवानेकाः समस्याः समुद्भूताः। यदि भारतीयायाः संस्कृते लेशमात्रमपि तत्र स्यात्स्मावेशस्तर्हि नैतादृशी दुर्व्यवस्था स्यादिति मन्ये। प्रशिक्षितानामपि शिक्षकाणामाचारो व्यवहारो वा पश्यामस्तर्हि दृढाञ्चिन्तनाय भवति प्रकृतिः यद्।

कस्याः संस्कृतेः प्रभावोयम्। यदाशिक्षकाणामेव व्यवहारो न वर्त्तते समीचीनस्तर्हि छात्राणां का कथात्र? सम्प्रति शिक्षायां किं किं न जायते, सर्वेषा वर्णनं नावाश्यकं न वा सम्भवम्। कुत्राप्याचारव्यवस्था नैव समवलोक्यते। आचारनिर्धारणमेव नास्ति। सर्वे च नियमाः दुर्बलानां कृते एव वर्त्तते। शिक्षायाः राजनीतिकरणमपि दौर्भाग्यस्य विषयः। न स्वयं पठन्ति, न वा पाठयन्ति, अन्यानपि बाधन्ते। शिक्षायाः प्रयोजनमपि विस्मृतम्। एवमेव वर्त्तमानसमये धर्मोपदेशकानामपि भूमिका राष्ट्रहिताय न वर्त्तते। तपश्चर्या कर्त्तुं गृहान्निष्कान्ता अपि वित्रैषणया पराजिताः भवन्ति। वित्तागमश्चानर्थमूलं साधूनाम्। स्वशरीरपोषकाः स्वसुख-सौविध्यलोलुपाः भवन्ति। वित्तेषणालोकैषणाग्रहग्रहिला एव दृश्यन्ते। कथं समाजस्य राष्ट्रस्य वा कल्याणचिन्तनं करिष्यन्तीति। भारतीयाः संस्कृतेरभावादेव सर्वत्र दुर्व्यवस्था परिलक्ष्यते इति शम्।